अमरः । संज्ञायां कन् । २राजहंसे शब्दच० । स्वार्थे क । ३हंसशब्दार्थे "लघुगुरुर्लघुर्यत्र स तालो हंसकः स्मृतः" संगीतदा० उक्ते ४तालभेदे ।

**हंसकीलक** पु० "नारी पादद्वयं कृत्वा कान्तस्योरुयुगोपरि । कटिमान्दोलयेत् यत्र बन्धोऽयं हंसकीलकः" स्मरदीपिकोक्ते रतिबन्धभेदे । [भाषिण्यां स्त्रियां त्रिका० ।

**हंसगद्गदा** स्त्री हंसस्येव गद्गदः स्वरो यस्याः । मधुर

**हंसगामिनी** स्त्री हंस इव मृदु गच्छति गम-णिनि । १हंसतुल्यमृदुगामिन्यां स्त्रियाम् । हंसेन गच्छति णिनि ङीप् । २ब्रह्माण्याम् । ३हंसेन गन्तरि त्रि० ।

**हंसदाहन** न० हंस इव श्वेतं सुरभित्वात् दाहनमस्य । अगुरुचन्दने शब्दच० ।

**हंसनादिनी** स्त्री "गजेन्द्रगमना तन्वी कोकिलालापसंयुता । नितम्बे गुर्विणी या स्यात् सा स्मृता हंसनादिनी" इत्युक्तलक्षणायां नार्याम् शब्दमाला ।

**हंसपदी** स्त्री हंसस्येव पादाः मूलान्यस्याः पाद्भावे स्त्रियां ङीपि पद्भावः । गोधापदीलतायाम् राजनि० । [हला० ।

**हंसपाद** न० हंसस्य पादः तद्वर्णोऽस्त्यस्य अच् । हिङ्गुले

**हंसपादिका** स्त्री हंसस्येव पादाः मूलान्यस्य कप् कापि अत इत्त्वम् । हंसपदीलतायां राजनि० ।

**हंसपादी** स्त्री हंसस्येव पादाः मूलानि सन्त्यस्याः अच् गौरा० ङीष् । हंसपदीलतायां रत्नमा० ।

**हंसमाला** स्त्री ६त० । पङ्क्त्याकारेण स्थिते १हंससमूहे २कादम्बे हंसे च शब्दच० । [माषपर्ण्याम् राजनि० ।

**हंसमाषा** स्त्री हंसा विशुद्धः माषः तदाकारः पर्णोऽस्याः ।

**हंसरथ** पु० हंसः रथो वाहनं यस्य । १चतुर्मुखे ब्रह्माणि त्रिका० । हंसवाहनादयोऽप्यत्र । [उपधातौ राजनि० ।

**हंसलोमश** न० हंस इव लोमशं लोमयुक्तम् । कासीसे

**हंसलोहक** न० हंस इव लोहकम् । पित्तले धातौ हेमच० ।

**हंसवती** स्त्री हंसस्तत्पादाकारः मूलेऽस्त्यस्याः मतुप् मस्य वः ङीप् । २हंसपद्याम् जटा० । ३हंसयुक्ते त्रि० ।

**हंसवीज** न० हंसस्य वीजमत्र । हंसडिम्बे राजनि० ।

**हंसाङ्घ्रि** पु० हंसस्याङ्घ्रिरिव लोहितत्वात् । हिङ्गुले ।

**हंसारूढ** पु० हंसमारूढः आ+रुह-क्त । १ब्रह्मणि २तच्छक्त्यां ब्रह्माण्यां स्त्री हंसाधिरूढे उभयत्र सरस्वत्यां स्त्री । [हेमच०

**हंसाभिख्य** न० हंसस्येवाभिख्या शुभ्रत्वात् यस्य । रूप्ये

**हंसी** स्त्री हंसस्य भार्य्या ङीप् । १हंसयोषिति शब्दर० द्वाविंशत्यक्षरपादके २छन्दोभेदे च "मौ गौ नास्त्वारा गो गो वस्तुभुवनयतिरिह भवति हंसी" छन्दो० । ३हंसजातिस्त्रियाञ्च ।

**हंसोदक** न० । "नादेयं नवमृद्घटेषु निहितं सन्तप्तमर्कांशुभिः यामिन्याञ्च निविष्टमिन्दुकिरणैर्मन्दानिलान्दोलितम् । एलाद्यैः परिवासितं श्रमहरं पित्तोष्णदाहे विषे मूर्च्छारक्तमदात्ययेषु च हितं शंसन्ति हंसोदकम्" राजनि० उक्ते जलभेदे ।

**हंहो** अव्य० हंमित्यव्यक्तं जहाति हा-डो । १सम्बोधने "हंहो चिन्मयचित्तचन्द्रमणयः" चन्द्रालोकः । २दर्पे ३दम्भे ४प्रश्ने च शब्दर० ।

**हक्क** पु० हक् इत्यव्यक्तं कायति कै-क । गजसमाह्वाने जटा०

**हञ्जे(ञ्जा)** अव्य० हमित्यव्यक्तं जप्यतेऽत्र जप-डे डा वा । नाट्योक्तियायां नटाभिनेयकृते चेटीसम्बोधने अमरः टावन्तस्तत्रार्थे भरतः आदन्तोऽप्यव्ययम् वसन्तराजः ।

**हञ्जि** पु० हमित्यव्यक्तं जयति जि-डि । क्षुधायां जटा० ।

**हञ्जिका** स्त्री हञ्जौ क्षुधायां कायति शब्दयते कै घञर्थे कर्मणि क । भार्ग्यां भावप्र० क्षुधाहेतुत्वात्तस्यास्तथात्वम् ।

**हट** दीप्तौ भ्वा० प० अक० सेट् । हटति अहटीत्-अहाटीत्

**हटपर्णि** न० हटं दीप्तिं पिपर्त्ति पॄ० बा० नि । शैवाले शब्दर० ।

**हट्ट** पु० हट-ट टस्य नेत्त्वम् । क्रयविक्रयस्थाने (हाट) अमरः । "प्रतिहट्टपथे घरट्टजादिति" नैष० ।

**हट्टचौरक** पु० हट्टे प्रकाशिते स्थाने एव चौरः स्वार्थे क । (हाटचोर) चौरभेदे शब्दर० ।

**हट्टविलासिनी** स्त्री हट्टं विलासयति वि+लस-णिच्-णिनि ङीप् । १गन्धद्रव्यभेदे अमरः । २हरिद्रायाञ्च भावप्र० । [हठति । अहाठीत्-अहठीत् ।

**हठ** कीलबन्धे सक०बलात्कारे प्लुतौ च अक०भ्वा० पर०सेट् ।

**हठ** पु० हठ-अच् । बलात्कारे अमरः २प्रसह्याञ्च मेदि० ।

**हठपर्णी** स्त्री हठते प्लवते हठ-अच् हठं प्लवमानं पर्णं यस्याः ङीप् । १शैवाले त्रिका० २कुम्भिकायाञ्च ।

**हठयोग** पु० हठेन बलात्कारेण योगः । प्राणायामादिक्रियाभ्यासजे राजयोगं विनैव परमात्मसाक्षात्काररूपे चित्तवृत्तिनिरोधात्मके योगे ।

योगश्च द्विविधः हठयोगः राजयोगश्च । तत्र हठयोगः क्रियाविशेषसाध्यः हठदीपिकादावुक्तप्रकारः । राजयोगस्तु भावनाविशेषसाध्यः पातञ्जलादावुक्तः । स च पतञ्जलिशब्दे ४२०४पृ० दर्शितः । हठयोगोऽत्र साङ्गोऽभिधीयते तत्साधनप्रशंसादिः उभययोगयोरपि परस्परसापेक्षतया